योगवासिष्ठः/प्रकरणम् ५ (उपशमप्रकरणम्)/सर्गः ०५

पञ्चमः सर्गः ५

श्रीवसिष्ठ उवाच ।

इदमुत्तमसिद्धान्तसुन्दरं सुन्दराकृते ।

उपशान्तिप्रकरणं श्रृणुष्वावहितो हितम् ।। १

दीर्घसंसारमायेयं राम राजसतामसैः ।

धार्यते जन्तुभिर्नित्यं सुस्तम्भैरिव मण्डपः ।। २

सत्त्वस्यजातिभिर्धीरैस्त्वादृशैर्गुणबृंहितैः ।

हेलया त्यज्यते पक्वा मायेयं त्वगिवोरगैः ।। ३

ये सत्त्वजातयः प्राज्ञास्तथा राजससात्त्विकाः ।

विचारयन्ति ते साधो जगत्पूर्वपरम्पराम् ।। ४

शास्त्रसज्जनसत्कार्यसङ्गेनोपहतैनसाम् ।

सारावलोकिनी बुद्धिर्जायते दीपिकोपमा ।। ५

स्वयमेव विचारेण विचार्यात्मानमात्मना ।

यावन्नाधिगतं ज्ञेयं न तावदधिगम्यते ।। ६

प्रज्ञावतां नयवतां धीराणां कुलशालिनाम् ।

जात्या राजससत्त्वानां मुख्यस्त्वं रघुनन्दन ।। ७

स्वयमालोकय प्राज्ञ संसारारम्भदृष्टिषु ।

किं सत्यं किमसत्यं वा भव सत्यपरायणः ।। ८

आदावन्ते च यन्नास्ति कीदृशी तस्य सत्यता ।

आदावन्ते च यन्नित्यं तत्सत्यं नाम नेतरत् ।। ९

आद्यन्तासन्मये यस्य वस्तुन्यासज्जते मनः ।

तस्य मुग्धपशोर्जन्तोर्विवेकः केन जन्यते ।। १०

जायते मन एवेह मन एव विवर्धते ।

सम्यग्दर्शनदृष्ट्या तु मन एव हि मुच्यते ।। ११

श्रीराम उवाच ।

ज्ञातमेतन्मया ब्रह्मन्यथास्मिन्भुवनत्रये ।

मन एव हि संसारिजरामरणभाजनम् ।। १२

यस्तस्योत्तरणोपायस्तन्मे ब्रूहि सुनिश्चितम् ।

हार्दं तमस्त्वयार्केण राघवाणां विनाश्यते ।। १३

श्रीवसिष्ठ उवाच ।

पूर्वं राघव शास्त्रेण वैराग्येण परेण च ।

तथा सज्जनसङ्गेन नीयतां पुण्यतां मनः ।। १४

सौजन्योपहितं चेतो यदा वैराग्यमागतम् ।

तदानुगम्या गुरवो विज्ञानगुरवोऽपि ये ।। ११

ततस्तस्योपदिष्टेन कृत्वा ध्यानार्चनादिकम् ।

क्रमेण पदमाप्नोति तद्यत्परमपावनम् ।। १६

विचारेणावदातेन पश्यत्यात्मानमात्मना ।

इन्दुना शीतलेनान्तर्विश्वं खमिव तेजसा ।। १७

तावद्भवमहाम्भोधौ जनस्तृणवदुह्यते ।

विचारतटविश्रान्तिमेति यावन्न चेतसा ।। १८

विचारेण परिज्ञातवस्तुनोऽस्य जनस्य धीः ।

सर्वानधःकरोत्याधीन्सौम्याम्भ इव वालुकाः ।। १९

इदं रुक्ममिदं भस्म परिज्ञातमिति स्फुटम् ।

न यथा हेमकारस्य हेमज्ञानात्मनस्तथा ।। २०

अक्षयोऽयं मनागात्मा स्वात्मन्यवगते चिरम् ।

भवतीति नरस्येह मोहस्यावसरः कुतः ।। २१

अपरिज्ञातसारे हि मनोऽन्तर्यदि मुह्यते ।

ज्ञातसारे त्वसंदिग्धमसती किल मूढता ।। २२

हे जना अपरिज्ञात आत्मा वो दुःखसिद्धये ।

परिज्ञातस्त्वनन्ताय सुखायोपशमाय च ।। २३

मिश्रीभूतमिवानेन देहेनोपहतात्मना ।

व्यक्तीकृत्य स्वमात्मानं स्वस्था भवत मा चिरम् ।। २४

देहेनास्य न संबन्धो मनागेवामलात्मनः ।

हेम्नः पङ्कलवेनेव तद्गतस्यापि मानवाः ।। २५

पृथगात्मा पृथग्देही जलपद्मलवोपमौ ।

ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।। २६

जडधर्मि मनो यावद्गर्तकच्छपवत्स्थितम् ।

भोगमार्गवदामूढं विस्मृतात्मविचारणम् ।। २७

तावत्संसारतिमिरं सेन्दुनापि सवह्निना ।

अर्कद्वादशकेनापि मनागपि न भिद्यते ।। २८

संप्रबुद्धे हि मनसि स्वां विवेचयति स्थितिम् ।

नैशमर्कोदय इव तमो हार्दं पलायते ।। २९

नित्यमुत्तमबोधाय योगशय्यागतं मनः ।

बोधयेद्भवभेदाय भवो ह्यत्यन्तदुःखदः ।। ३०

यथा रजोभिर्गगनं यथा कमलमम्बुभिः ।

न लिप्यते हि संश्लिष्टैर्देहैरात्मा तथैव च ।। ३१

कर्दमादि यथा हेम्ना श्लिष्टमेति पृथक्स्थितम् ।

नान्तःपरिणतिं याति जडो देहस्तथात्मना ।। ३२

सुखदुःखानुभावित्वमात्मनीत्यवबुध्यते ।

असत्यमेव गगने बिन्दुताम्लानते यथा ।। ३३

सुखदुःखे न देहस्य सर्वातीतस्य नात्मनः ।

एते ह्यज्ञानकस्यैव तस्मिन्नष्टे न कस्यचित् ।। ३४

न कस्यचित्सुखं किंचिद्दुःखं च नच कस्यचित् ।

सर्वमात्ममयं शान्तमनन्तं पश्य राघव ।। ३५

इमा याः परिदृश्यन्ते वितताः सृष्टिदृष्टयः ।

पयसीव तरङ्गास्ते पिच्छं व्योम्नीव चात्मनि ।। ३६

यथा मणिर्ददात्यात्मच्छायाः स्वयमकारणम् ।

तेजोमयीस्तथैवायमात्मा सृष्टीः प्रयच्छति ।। ३७

आत्मा जगच्च सुमते नैकं न द्वैतमप्यसत् ।

आभासमात्रमेवेदमित्थं संप्रति जृम्भते ।। ३८

समस्तं खल्विदं ब्रह्म सर्वमात्मैवमाततम् ।

अहमन्यदिदं चान्यदिति भ्रान्तिं त्यजानघ ।। ३९

तते ब्रह्मघने नित्ये संभवन्ति न कल्पनाः ।

विच्छित्तयः पयोराशौ यथा राम न सन्मयाः ।। ४०

एकस्मिन्नेव सर्वस्मिन्परमात्मनि वस्तुनि ।

द्वितीया कल्पना नास्ति वह्नौ हिमकणा यथा ।। ४१

भावयन्नात्मनात्मानं चिद्रूपेणैव चिन्मयम् ।

ऋजूज्ज्वलमये ह्यात्मा स्वयमात्मनि जृम्भते ।। ४२

न शोकोस्ति न मोहोस्ति न जन्मास्ति न जन्मवान् ।

यदस्तीह तदेवास्ति विज्वरो भव राघव ।। ४३

निर्द्वन्द्वो नित्यसत्त्वस्थो निर्योगक्षेम आत्मवान् ।

अद्वितीयो विशोकात्मा विज्वरो भव राघव ।। ४४

समः स्वस्थः स्थिरमतिः शान्तशोकमना मुनिः ।

मौनी वरमणिस्वच्छो विज्वरो भव राघव ।। ४५

विविक्तः शान्तसंकल्पो धीरधीर्विजिताशयः ।

यथाप्राप्तानुवर्ती च विज्वरो भव राघव ।। ४६

वीतरागो निरायासो विमलो वीतकल्मषः ।

नादाता न परित्यागी विज्वरो भव राघव ।। ४७

विश्वातीतपदं प्राप्तः प्राप्तप्राप्तव्यपूरितः ।

पूर्णार्णववदक्षुब्धो विज्वरो भव राघव ।। ४८

विकल्पजालनिर्मुक्तो मायाञ्जनविवर्जितः ।

आत्मनात्मनि तृप्तात्मा विज्वरो भव राघव ।। ४९

अनन्तापारपर्यन्तवपुरात्मविदांवर ।

धराधरशिरोधीरो विज्वरो भव राघव ।। ५०

यथाप्राप्तानुभवनात्सर्वत्रानभिवाञ्छनात् ।

त्यागादानपरित्यागाद्विज्वरो भव राघव ।। ५१

आत्मन्येवात्मनौदार्यं भज पूर्ण इवार्णवः ।

आत्मन्येवात्मनाह्लादं भज पूर्णेन्दुबिम्बवत् ।। ५२

विश्वप्रपञ्चरचनेयमसत्यरूपा

नासत्यरूपमनुधावति राम तज्ज्ञः ।

तज्ज्ञोऽसि शान्तकलनोऽसि निरामयोऽसि

नित्योदितोऽसि भव सुन्दर शान्तशोकः ।।५३

एकातपत्रमवनौ गुरुणोपदिष्टं

सम्यक्सुपालय चिरं समयेह दृष्ट्या ।

राज्यं समस्तगुणरञ्जितराजलोक-

स्त्वाशो न युक्तइह कर्मसु नापि रागः ।। ५४

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये मोक्षोपायेषु उपशमप्रकरणे प्रशमोपदेशो नाम पञ्चमः सर्गः ।। ५ ।।